साहित्यम् । शास्त्री I 15-06-2021

शिशुपालवधम् । श्लोकव्याख्या ।

" नैतल्लघ्वपि भूयस्या वचो वाचातिशय्यते ।
इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ॥ "

पद्यमिदं महाकविमाघप्रणीतस्य 'शिशुपालवध' महाकाव्यस्य द्वितीयसर्गाद् उद्धृतमस्ति । अत्र कविः बलराममुखेन श्रीकृष्णस्य उक्तेः अनुलङ्घनीयत्वम् प्रतिपादयति ।

श्लोकस्य भावार्थः अस्ति यत् स्वल्पाक्षरमपि भगवतः श्रीकृष्णस्य इदं वचनं विपुलया अस्मदादीनां वाण्या नोल्लङ्घयितुं शक्यते काष्ठराशिदाहकः अग्निरपि स्वतेजसा सूर्यं न अतिक्रामति ।

**अन्वयः** → लघु अपि एतत् वचः भूयस्या न अतिशय्यते । इन्धनौघधक् अपि अग्निः त्विषा पूषणं न अत्येति ।

**शब्दार्थः** → लघु अपि = स्वल्पमपि । एतत् वचः = श्रीकृष्णस्य वचनम् । भूयस्या = विस्तृतया । वाचा = वाण्या । न अतिशय्यते = नोल्लङ्घयितुं शक्यते । इन्धनौघधक् = इन्धनानाम् ओघः तम् दहति । अग्निः = वह्निः, पावकः । त्विषा = प्रभया, कान्तिरित्यर्थः । पूषणं = भास्करम्, सूर्यम् । न = नहि । अत्येति = अतिक्रामति, पराभवितुं शक्नोति ।

**अलङ्कारः** → दृष्टान्तः । तल्लक्षणम् →
" दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् । "

**छन्दः** → अनुष्टुप् ।

15-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
राधा-उमाकान्त सं० महावि० सुरखसेना,
पूर्णियाँ ।

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् ।

वस्तुनिष्ठ प्रश्नोत्तराणि →

1. प्र० → सर्वधनेषु द्रव्येषु वा उत्तमं धनं किम् ? उ० → विद्या ।

2. प्र० → विद्या किं ददाति ? उ० → विनयम् ।

3. प्र० → का विद्या वृद्धत्वे हास्याय भवति ?
उ० → शस्त्रविद्या वृद्धत्वे हास्याय भवति ।

4. प्र० → का विद्या सदा आद्रियते ?
उ० → शास्त्रविद्या सदा आद्रियते ।

5. प्र० → हितोपदेशे कानि प्रकरणानि ?
उ० → चत्वारि प्रकरणानि । तानि नामानि सन्ति → मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिश्च ।

6. प्र० → हितोपदेशस्य ग्रन्थस्य कर्ता, रचयिता, लेखकः, कविर्वा कः ?
उ० → श्रीनारायणपण्डितः ।

7. प्र० → हितोपदेशस्य मित्रलाभे कियन्त्यः कथाः वर्तन्ते ?
उ० → अष्ट कथाः वर्तन्ते ।

8. प्र० → भागीरथीतीरे किं नाम नगरम् ? उ० → पाटलीपुत्रम् ।

9. प्र० → तत्र किं नाम राजा आसीत् ? उ० → सुदर्शनः ।

10. प्र० → अनर्थाय कानि सन्ति ? उ० → अनर्थाय यौवनं, द्रविणं, प्रभुत्वम्, अविवेकत्वञ्च सन्ति ।

11. प्र० → केन पुत्रेण न कोऽपि लाभः ?
उ० → अविदुषा, अधार्मिकेण पुत्रेण न कोऽपि लाभः ।

12. प्र० → कः पुत्रः सर्वदा दुःखकरः भवति ? उ० → मूर्खः पुत्रः ।

13. प्र० → कः जातः ? उत्तरः → येन जातेन वंशः समुन्नतिं याति ।

15-06-2021

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

15-06-2021

संस्कृतसामान्यम्। उपशास्त्री I

अनिवार्यपत्रम् । हितोपदेशः । श्लोक-व्याख्या ।

" तानीन्द्रियाण्यविकलानि, तदेव नाम,
या बुद्धिरप्रतिहता, वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव,
अन्यः क्षणेन भवतीति विचित्रमेतत् ॥"

सन्दर्भः → श्लोकोऽयं श्रीनारायणपण्डितेन विरचितस्य हितोपदेशात् (मित्रलाभात्) ग्रन्थात् मूषक-परिव्राजककथात् उद्धृतोऽस्ति ।
हितोपदेशः नीतियुक्तायाः कथायाः संकलनमस्ति ।

प्रसङ्गः → कविरत्र मूषकमाध्यमेन धनस्य प्रभावं वर्णयति । धनवान् पुरुषः कीदृग्भवति, व्यतीतेषु धनेषु नरस्य दशा विचित्रा भवति ।

अन्वयः → अर्थोष्मणा विरहितः पुरुषः स एव (किन्तु) तानि इन्द्रियाणि अविकलानि (भवन्ति), या अप्रतिहता बुद्धिः, तत् एव वचनम्, क्षणेन अन्यः भवति इति, एतत् विचित्रम् ।

शब्दार्थः व्याकरणञ्च → अर्थोष्मणा = वित्तोष्मणा । विरहितः = वियुक्तः । पुरुषः = नरः । वि + √रह् + क्त:
इन्द्रियाणि = शरीरस्थाः अवयवाः । अविकलानि → न विकलानि = समस्तम्, अक्षतम् । अप्रतिहता → न प्रतिहता = निर्बाधा, बाधारहिता । वचनम् = वाणी, वाक्यम् । क्षणेन = समयेन ।
इति एतत् = इदं । विचित्रम् = आश्चर्यम् ।

तात्पर्यः → वित्तरहितः पुरुषः पूर्वं (धनसत्वसमये) यथाभवत् तद्वत् धनहीनावस्थायां भवति । पूर्वसदृशं नाम, बुद्धिः, वाणी भवन्ति किन्तु विगतेषु धनेषु तस्यावस्था विचित्रा जायते इत्याश्चर्यम् ।

विशेषः → विशेषोक्तिः अलङ्कारः तल्लक्षणम् -
"सति हेतौ फलाभावे ।"

15-06-2021

डॉ० निर्मलकुमार झा, (सं०प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

15-06-2021

① शास्त्री - III

साहित्य (प्रतिष्ठा), मालविकाग्निमित्रम्, श्लोकव्याख्या।
सप्तम पत्रम्

मैंने पूर्व की कक्षाओं में मालविकाग्निमित्र नाटक को अष्टम पत्र में पढ़ाया बताया था, ऐसा भूलवश होगया। कृपया सभी छात्र/छात्राएँ सप्तम पत्र में मालविकाग्निमित्रम् तथा रत्नावली नाटिका के प्रश्नोत्तरों को सहेजेंगे।

आज मालविकाग्निमित्रम् समाप्त हो रहा है। मैं जब आपकी कक्षा में आऊँगा तब 'रत्नावली' नाटिका पढ़ाऊँगा। अब मालविकाग्निमित्रम् का यह श्लोकव्याख्या देखें →

" अप्याकरसमुत्पन्नो रत्नजातिपुरस्कृतः।
जातरूपेण कल्याणि मणिः संयोगमर्हति ॥ "

प्रसङ्गादिः पूर्ववत्श्लोकानुसारेण।
राजमहिषी धारिणी सम्प्रति क्रुद्धा नास्ति। सा हर्षेण राज्ञे अग्निमित्राय मालविकां पारितोषिकरूपेण यच्छति। ततः विदूषकः राजमहिषीं 'धारिणीं' कथयति यत् अत्र भवान् (राजा अग्निमित्रः) धारिण्या एव दत्तबहुस्नेहाम् देवीशब्देनादृतां मालविकाम् अङ्गीकर्तुम् अभिलषति। परिव्राजिका अस्य कथनस्य समर्थनं करोति। सा कथयति यत् →

अन्वयः → कल्याणि! आकरसमुत्पन्नो अपि मणिः रत्नजातिपुरस्कृतः जातरूपेण संयोगम् अर्हति।

②

शब्दार्थाः व्याकरणानि च →

कल्याणि = भद्रे। आकरसमुत्पन्नः → आकरात् समुत्पन्नः = खनिसमुद्धृतोऽपि। रत्नजातौ → रत्नानां जातिः तस्मिन् = रत्नसामान्ये। पुरस्कृतः → पुरः + कृतः = श्रेष्ठभावेन परिगणितोऽपि। जातरूपेण = सुवर्णेन। संयोगम् = सहवासम्। अर्हति = अधिकरोति।

अलङ्कारः → अप्रस्तुतप्रशंसा। तल्लक्षणम् →

अप्रस्तुतप्रशंसा या सा प्रस्तुताश्रया।

छन्दः → पथ्यावक्त्रम्। 'अनुष्टुप्' छन्दस्य भेदः
तल्लक्षणम् →
" श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ "

[signature] 15-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्यः।
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ।